श्रीमद्भगवद्गीता
Śrīmad-Bhagavad-gītā
The Song of the Lord

with three Vaisnava commentaries
Version 0.1

edited, translated, and annotated
by
Toke Lindegaard Knudsen
assisted by Neal Delmonico

October 7, 2000

Chapter 1

सैन्यदर्शनम् (Viewing the Armies)

धृतराष्ट्र उवाच
धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥१ ॥

श्रीधरी (सुबोधिनी)

श्रीगणेशाय नमः
श्रीमज्जगद्गुरवे नमः
श्रीकृष्णाय नमः

शेषाशेषमुखव्याख्याचातुर्यं त्वेकवक्त्रतः ।
दधानमद्भुतं वन्दे परमानन्दमाधवम् ॥१ ॥

श्रीमाधवं प्रणम्योमाधवं विश्वेशमादरात् ।
तद्भक्तियन्त्रितः कुर्वे गीताव्याख्यां सुबोधिनीम् ॥२ ॥

भाष्यकारमतं सम्यक् तद्व्याख्यातृगिरस्तथा ।
यथामति समालोड्य गीताव्याख्यां समारभे ॥३ ॥

गीता व्याख्यायते यस्याः पाठमात्रादयत्नतः ।
सेयं सुबोधिनीटीका सदा ध्येया मनीषिभिः ॥ ४ ॥

इह खलु सकललोकहितावतारः सकलवन्दितचरणः परमकारुणिको भगवान् देवकीनन्दनस्तत्त्वज्ञानविजृम्भितशोकमोहविभ्रंशितविवेकतया निजधर्मत्यागपरधर्माभिसन्धिपरमर्जुनं धर्मज्ञानरहस्योपदेशप्लवेन तस्माच्छोकमोहसागरादुद्दधार । तमेव भगवदुपदिष्टमर्थं कृष्णद्वैपायनः सप्तभिः श्लोकशतैरुपनिबबन्ध । तत्र च प्रायशः श्रीकृष्णमुखान्निःसृतानेव श्लोकानलिखत् कांश्चित्तत्सङ्गतये स्वयं व्यरचयद्यथोक्तं गीतामाहात्म्ये:

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तारैः ।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता ॥

इति निरूप्यते – धर्मक्षेत्र इति । भोः सञ्जय धर्मभूमौ कुरुक्षेत्रे मत्पुत्राः पाण्डुपुत्राश्च युयुत्सवः योद्धुमिच्छन्तः समवेताः मिलिताः सन्तः किं कृतवन्तः ॥ १ ॥

सञ्जय उवाच:

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसङ्गम्य राजा वचनमब्रवीत् ॥ २ ॥

श्रीधर: दृष्ट्वेति । पाण्डवानामनीकं सैन्यं व्यूढं व्यूहरचनया व्यवस्थितं दृष्ट्वा द्रोणाचार्यसमीपं गत्वा राजा दुर्योधनो वक्ष्यमाणं वाक्यमुवाच ॥ २ ॥

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् ।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥

श्रीधरः तदेव वाक्यमाह – पश्यैतामित्यादिनवभिः श्लोकैः । भो आचार्य पाण्डवानां विततां चमूं सेनां पश्य । द्रुपदपुत्रेण धृष्टद्युम्नेन व्यूढां व्यूहरचनया अधिष्ठिताम् ॥ ३ ॥

अत्र शूरा महेष्वासा भीमार्जुनसमा ।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥ ४ ॥

श्रीधरः अत्रास्यां चम्वामिष्वो बाणा अस्यन्ते क्षिप्यन्ते एभिरिति इष्वासाः धनूंषि महान्त इष्वासा येषां ते तथा ।भीमार्जुनौ तावदत्रातिप्रसिद्धौ योद्धारौ ताभ्यां समाः शूराः शौर्येण क्षात्रधर्मेण उपेताः सन्ति तानेव नामभिर्निर्दिशति । युयुधानः सात्यकिः ॥ ४ ॥

धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् ।
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः ॥ ५ ॥

श्रीधरः धृष्टकेतुरिति । चेकितानो नाम एको राजा । नरपुङ्गवः नरश्रेष्ठः शैब्यः ॥ ५ ॥

युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६ ॥

श्रीधरः युधामन्युश्चेति । विक्रान्तो युधामन्युर्नामैकः सौभद्रोऽभिमन्युः द्रौपदेया द्रौपद्यां पञ्चभ्यो युधिष्ठिरादिभ्यो जाताः प्रतिविन्ध्यादयः पञ्च । महारथादीनां लक्षणम्ः

एको दशसहस्राणि योधयेद्यस्तु धिन्वनाम् ।
शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः ॥
अमितान्योधयेद्यस्तु सम्प्रोक्तोऽतिरथस्तु सः ।
रथी त्वेकेन यो युद्धयेत्तन्न्यूनोऽर्धरथी मतः

इति ॥ ६ ॥

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ॥ ७ ॥

श्रीधरः अस्माकमिति । निबोध बुध्यस्व नायकाः नेतारः संज्ञार्थं सम्यग्ज्ञानार्थमित्यर्थः ॥ ७ ॥

भवान्भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ ८ ॥

श्रीधरः तानेवाह भवानिति द्वाभ्याम् । भवान्द्रोणः समितिं सङ्ग्रामं जयतीति तथा । सौमदत्तिः सोमदत्तस्य पुत्रो भूरिश्रवाः ॥ ८ ॥

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥ ९ ॥

श्रीधरः अन्ये चेति । मदर्थे मत्प्रयोजनार्थं त्यक्तुमध्यवसिता इत्यर्थः । नाना अनेकानि शस्त्राणि प्रहरणसाधनानि येषां ते युद्धे विशारदाः निपुणा इत्यर्थः ॥ ९ ॥

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ १० ॥

श्रीधरः ततः किमित्यत आह अपर्याप्तमिति । तत् तथाभूतैर्वीरैर्युक्तमपि भीष्मेणाभिरक्षितमप्यस्माकं बलं सैन्यमपर्याप्तं तैः सह योद्धुमसमर्थं भाति । इदं तु एतेषां पाण्डवानां बलं भीमेनाभिरक्षितं सत् पर्याप्तं समर्थं भाति । भीष्मस्योभयपक्षपातित्वात् । अस्मद्बलं पाण्डवसैन्यं प्रत्यसमर्थम् । भीमस्यैकपक्षपातित्वात् ॥ १० ॥